# शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र, दिल्ली

वार्षिक–पाठ्यक्रमः कक्षा –अष्टमी

सत्रम्– **2026-27** विषयः–संस्कृतम्

दीपकं पाठ्यपुस्तकाधारितः पाठ्यक्रमः

| पाठ्यवस्तु | व्याकरणबिन्दवः | अधिगमोद्देश्यानि | अधिगमसम्प्राप्तयः | गतिविधयः |
|---|---|---|---|---|
| **१. प्रथमः पाठः**<br>संगच्छध्वं संवदध्वम् | आत्मनेपदिनः क्रियापदानां लोट्लकारे अभ्यासः। उपपदविभक्तेः शिक्षणम्। | चतुर्थीद्वितीयाषष्ठीविभक्तीनां पुनराभ्यासः। उपपदविभक्तेः अभ्यासः। पाठ–अभ्यासाः | संघटन–सूक्तकथने दक्षाः भवन्ति। उपपदविभक्त्या परिचिताः भवन्ति। | वैदिकसाहित्यस्मरणप्रतिस्पर्धा–<br>कति वेदाः? कति उपवेदाः?<br>कति उपलब्धाः ब्राह्मणग्रन्थाः?<br>कति दर्शनानि? कति वेदाङ्गानि? इति। |
| **२. द्वितीयः पाठः**<br>अल्पानामपि वस्तूनां संहतिः कार्यसाधिका | ल्यप्प्रत्ययस्य अभ्यासः। विसर्गसन्धेः शिक्षणम्। । उपसर्गशिक्षणम् | पाठान्तर्गतप्रयुक्तानां ल्यप्प्रत्ययानां विसर्गसन्धियुक्तानां पाठेतरशब्दानाम् अभ्यासः। उपसर्ग–अभ्यासः, पाठ–अभ्यासाः। | ल्यप्प्रत्ययस्य प्रयोगे विसर्गसन्धेश्च प्रयोगे नैपुण्यं प्राप्नुवन्ति । पाठमाध्यमेन छात्रेषु कथाकथन-कौशलस्य विकासः। | ल्यप्प्रत्ययाधारितविसर्गसन्धेश्चाधारितानां वाक्यानां रचनाकला–शिक्षणम्। पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **३. तृतीयः पाठः**<br>सुभाषितरसं पीत्वा जीवनं सफलं कुरु | इकारान्त–उकारान्त–नपुंसक–लिङ्गशब्दरूपाणां स्मरणम्। | श्लोकानां गायनक्षमतायाः विकासः। पाठ–अभ्यासाः। सस्वरगायनं शिक्षन्ते। श्लोकानां भावार्थस्य ज्ञानम्, अभ्यासकार्यञ्च । | पाठे आगतानां श्लोकानां मूल्यानाम् अनुभूतिः। पद्यगायने समर्थाः भवन्ति। | पाठान्तर्गत–प्रयुक्तेभ्यः सुभाषितेभ्यः नीतिवाक्यानि स्वीकृत्य कक्षायां समूहेषु एकैकं नीतिवाक्यं गृहीत्वा चर्चा करणीया। |
| **४. चतुर्थः पाठः**<br>प्रणम्यो देशभक्तोऽयं गोपबन्धुर्महात्मना | अयादिसन्धिः पूर्वरूपसन्धिः। क्तवतुप्रत्ययस्य पुनराभ्यासः | पाठ–अभ्यासाः। पूर्वरूपसन्धि–युक्तपदानाम् क्तवतुक्रियापदानाम् च अभ्यासः। | अयादि–पूर्वरूपसन्धौ क्तवतु–अभ्यासे च दक्षाः भवन्ति। | कक्षायां छात्राः कस्य अपि स्वतन्त्रतासेनानिनः गाथां श्रावयन्ति। |

| | | | | |
|---|---|---|---|---|
| **५. पञ्चमः पाठः**<br>गीता सुगीता कर्तव्या | नकारान्तराजन्शब्दरूपस्य स्मरणम् | पञ्चमीसप्तमीविभक्त्योः वाक्येषु प्रयोगः। पाठ–अभ्यासाः। | पञ्चमी–सप्तमीविभक्तौ निपुणाः भवन्ति। | पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **६. षष्ठः पाठः**<br>**डिजिभारतम्–युगपरिवर्तनम्** | क्त–शतृप्रत्यययोः शिक्षणम्।<br>शतृप्रत्ययान्त–पुल्लिङ्ग–स्त्रीलिङ्गशब्दानां स्मरणम् | पाठ–अभ्यासाः।<br>आधुनिकयुगस्य आवश्यकतां ज्ञास्यन्ति। | भाषायां संवादे कुशलाः भवन्ति।<br>क्त–शतृप्रयोगे दक्षाः भवन्ति। | I. भारतसर्वकारस्य कामपि योजनां स्वीकृत्य पीपीटीनिर्माणम्।<br>II. शिक्षाक्षेत्रे डिजिटलभारतस्य योगदानम्।<br>III. क्तशतृप्रत्यययोः प्रयोगाभ्यासः।<br>IV. जीवने यूपीआई (UPI) प्रयोगस्य लाभाः हानयश्च वादविवादप्रतियोगितायाः आयोजनम्। |
| **७. सप्तमः पाठः**<br>मञ्जुलमञ्जूषा सुन्दरसुरभाषा | समासविषये सामान्या चर्चा।<br>सकारान्त–विद्वस्– शब्दरूपस्य स्मरणम् | पद्यपाठेषु गति -यति-लयभावाभि–नयपूर्वकं सस्वरगायनाभ्यासः।<br>भावार्थस्य ज्ञानम् अभ्यासकार्यञ्च। | संस्कृते गीत–गायनक्षमतायाः विकासः। | कक्षायां छात्रचतुष्टयं सम्मेल्य उत्साहपूर्वकं गीतगायनाभ्यासं करिष्यन्ति। |
| **पुनरावर्तनम्** | अपठित–गद्यांश–शिक्षणम्<br>पठित–पद्यांश–शिक्षणम् | पठित–गद्यांश–शिक्षणम्<br>पठित–संवाद–शिक्षणम् | अधीतपाठ्यक्रमस्य पुनरावृत्तिः। | |

**पाठ्यक्रम: 5 सितम्बर 2026 पर्यन्तं पूर्णं कारणीयम् ।**

**मध्यावधि: पाठ्यक्रमस्य पुनरावृत्ति: ।**

**मध्यावधि-परीक्षा**

| **पाठपरिचयः** | **व्याकरणबिन्दवः** | **अधिगम–उद्देश्यानि** | **अधिगमसम्प्राप्तिः** | **गतिविधयः** |
|---|---|---|---|---|
| **८. अष्टमः पाठः**<br>पश्यत कोणमैशान्यं भारतस्य मनोहरम् | तुमुन्प्रत्ययस्य पुनराभ्यासः।<br>सर्वनामशब्दरूपाणां स्मरणम् | पाठ–अभ्यासाः।<br>वाक्येषु क्रियार्थक्रियाप्रयोगं करिष्यन्ति।<br>भारतस्य वैविध्येन परिचिताः भवेयुः। | वाक्येषु क्रियार्थक्रियाप्रयोगे निपुणाः भवन्ति। | I. पाठे चर्चितराज्यानां पर्यटनस्थलानां विवरणम्।<br>II. अष्टपूर्वोत्तरप्रदेशानां वेशभूषाप्रदर्शनम्।<br>III. कस्यापि एकस्य राज्यस्य सम्पूर्णपरिचयदानाय पीपीटीप्रदर्शनम्।<br>IV. पाठे चर्चितराज्यानां मानचित्रे प्रमुखखनिजसम्पदां प्रदर्शनं तेषाम् उपयोगश्च। |
| **९. नवमः पाठः**<br>कोऽरुक्? कोऽरुक्? कोऽरुक्? | विशेषण–विशेष्यस्य पुनराभ्यासः।<br>श्चुत्वसन्धिः | विशेषण–विशेष्यं वाक्येषु प्रयोक्ष्यन्ते।<br>स्वास्थ्यनियमैः परिचिताः भविष्यन्ति।<br>श्चुत्वसन्धेः शिक्षणम्। | स्वास्थ्यनियमान् जानन्ति। | गतिविधिद्वारा श्लोकानां स्मरणं करिष्यन्ति। स्फोरकपत्रमाध्यमेन त्रिविधानाम् आहाराणां तालिकानिर्माणं करिष्यन्ति। पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **१०. दशमः पाठः**<br>सन्निमित्ते वरं त्यागः (क– भागः) | वाक्यसंरचनाविषयकं ज्ञानम्।<br>जश्त्वसन्धिः | पदविन्यासक्रमेण परिचिताः भविष्यन्ति।<br>जश्त्वसन्धेः शिक्षणम् | साहित्ये प्रयुक्तानां पदविन्यासविधया परिचिताः भवन्ति। | काञ्चित् कथां कथयिष्यन्ति। स्फोरकपत्रमाध्यमेन व्यञ्जनसन्धेः तालिकानिर्माणं करिष्यन्ति। पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **११. एकादशः पाठः**<br>सन्निमित्ते वरं त्यागः (ख भागः) | वाच्यविषयकं सामान्यज्ञानम्<br>अनुस्वार–परसवर्णसन्धिः | कर्तृवाच्य–कर्मवाच्य–भाववाच्यस्य सामान्यः परिचयः कारयिष्यति। | वाच्येन सामान्यतया परिचिताः भवन्ति। | सरलसंस्कृतवाक्यैः कथाकथनं करिष्यन्ति। पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |

| | | | | |
|---|---|---|---|---|
| **१२. द्वादशः पाठः**<br>सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते | णत्वविधानम् | वर्णोच्चारणविषये ज्ञास्यन्ति। पाठान्तर्गत–प्रयुक्तैः सन्धिसमासपदैः परिचिताः भवन्ति। | शुद्धवर्णोच्चारणे दक्षाः भवन्ति। | वेदाङ्गानां विषये चर्चां कुर्वन्ति। तस्य के रचनाकाराः सन्ति? शब्दरूपाणां वाक्येषु प्रयोगः। पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **१३. त्रयोदशः पाठः**<br>वर्णोच्चारण–शिक्षा१ | संख्यावाचिशब्दरूपाणां स्मरणम् | वाग्विज्ञानेन परिचिताः भविष्यन्ति। मुखे स्थितैः भिन्नस्थानकरणैःपरिचिताः भविष्यन्ति। | वाग्विज्ञानं जानन्ति। ताल्वादिस्थानेषु परिचिताः भवन्ति। | प्रायोगिकविधिना शब्दोच्चारणमाध्यमेन शिक्षकः छात्रान् मुखे विद्यमानानां स्थानानां परिचयं कारयेत्। पाठे प्रदत्तान् अभ्यासप्रश्नान् आधारीकृत्य गतिविध्यात्मक– कक्षाभ्यासस्य आयोजनम्। |
| **पुनरावर्तनम्** | अपठित–गद्यांश–शिक्षणम्<br>पठित–गद्यांश–शिक्षणम् | पठित–पद्यांश–शिक्षणम्<br>पठित–संवाद–शिक्षणम् | वार्षिकपरीक्षादृष्ट्या सकलपाठ्यक्रमस्य पुनरावृत्तिः। | |
| **अत्र ध्यातव्यम्** – सर्वेषु गद्यपाठेषु नाट्पाठेषु च शिक्षकः पाठस्य/कथायाः आदर्शवाचनम् , अनुवाचनम्, काठिन्यनिवारणं, शब्दार्थज्ञानं, लिङ्गज्ञानम्, अभ्यासकार्यञ्च छात्रसहायतया कारयिष्यति। | | | | |
| सर्वेषु पद्यपाठेषु शिक्षकः श्लोकानां गति -यति-लय-भावाभिनय-अनुसारं सस्वरगायनाभ्यासः, श्लोकानां भावार्थस्य ज्ञानम्, लिंगज्ञानम्, अभ्यासकार्यञ्च कारयिष्यति। | | | | |

- ❖ **पाठ्यक्रमः 30 जनवरी 2027 पर्यन्तं पूर्णं कारणीयम् ।**
- ❖ **शिक्षकः छात्राणां विविध–गतिविधिद्वारा सतत–आकलनं करिष्यति।**
- ❖ **वार्षिकमूल्याङ्कनं सकलपाठ्यक्रमात् भविष्यति।**

**वार्षिक-परीक्षा**

| | |
|---|---|
| **१. प्रथमः पाठः** संगच्छध्वं संवदध्वम् | |
| **२. द्वितीयः पाठः** अल्पानामपि वस्तूनां संहतिः कार्यसाधिका | |

**मध्यावधौ वार्षिकपरीक्षायां च मूल्याङ्कनाय पाठाः (70 अङ्काः)**

| |
|---|
| **३. तृतीयः पाठः** सुभाषितरसं पीत्वा जीवनं सफलं कुरु |
| **४. चतुर्थः पाठः** प्रणम्यो देशभक्तोऽयं गोपबन्धुर्महात्मना |
| **५. पञ्चमः पाठः** गीता सुगीता कर्तव्या |
| **७. सप्तमः पाठः** मञ्जुलमञ्जूषा सुन्दरसुरभाषा |
| **९. नवमः पाठः** कोऽरुक्? कोऽरुक्? कोऽरुक्? |
| **१०. दशमः पाठः** सन्निमित्ते वरं त्यागः (क–भागः) |
| **११. एकादशः पाठः** सन्निमित्ते वरं त्यागः (ख भागः) |
| **१२. द्वादशः पाठः** सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते |
| **१३. त्रयोदशः पाठः** वर्णोच्चारण–शिक्षा१ |

## आन्तरिक–मूल्याङ्कनाय पाठाः

| **आन्तरिक मूल्याङ्कन हेतु (२० अङ्क )** |
|---|
| **६. षष्ठः पाठः** डिजिभारतम्–युगपरिवर्तनम् |
| **८. अष्टमः पाठः** पश्यत कोणमैशान्यं भारतस्य मनोहरम् |

**टिप्पणी**– उपर्युक्तपाठद्वयं लिखितपरीक्षायां मूल्याङ्कनाय न स्तः। शिक्षकाः विविधगतिविधिषु स्वविवेकेन आन्तरिकमूल्याङ्कनाय एतेषां प्रयोगे स्वतन्त्राः सन्ति।